# Virabhadraprati Shivajnakathanam

# વીરભદ્રપ્રતિ શિવાજ્ઞાકથનમ્

## Document Information

Text title : Virabhadraprati Shivajnakathanam

File name : vIrabhadrapratishivAjnAkathanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 6 vIrabhadraviShNuyuddham | 12-34 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# વીરભદ્રપ્રતિ શિવાજ્ઞાકથનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

ભૈરવ (વીરભદ્ર) ઉવાચ ।

દેવ દેવ મહાદેવ કલ્યાણવરુણાલય ।
મરુત્પારણહારાઢ્યકન્ધરાનન્તવિક્રમ ॥ ૧૨॥

મામાજ્ઞાપય દેવેશ કિમત્ર કરવાણિ તે ।
કિં પિબામ્યમ્બુધીન્ સપ્ત તરઙ્ગાવલિઘૂર્ણિતાન્ ॥ ૧૩॥

ચૂર્ણિતં કિં ગિરિવ્રાતં કરોમિ પદઘાતતઃ ।
કિં બ્રહ્માણ્ડં મહાપિણ્ડં કરોમ્યદ્ય ચરાચરૈઃ ॥ ૧૪॥

ભૂચક્રમખિલં ચાત્ર ચિત્રનેત્રાગ્નિના દહન્ ।
કિં વા સુરાસુરવ્રાતં પાતયામિ મૃતં પુરઃ ॥ ૧૫॥

શીઘ્રમાજ્ઞાપયેદાનીં મા વિલમ્બિતુમર્હસિ ।
તદ્ભૈરવોરુરભસા વચસા પરમેશ્વરઃ ॥ ૧૬॥

વિપ્રયોગેણ વૈ દેવ્યા દુઃસહેનૈવ સુવ્રતાઃ ।
તદા તીવ્રતરં સ્વાઙ્ગાત્સસર્જ ભુવિ તર્જકાન્ ॥ ૧૭॥

સૌમ્યાનથ ગણશ્રેષ્ઠાનસૌમ્યાન્ શિવભાવનાન્ ।
તુરઙ્ગવરમાતઙ્ગસારઙ્ગાસ્યાન્ મનોહરાન્ ॥ ૧૮॥

કાકોલૂકબકાભાસ્યાન્ વૃકભેકાસ્યકાંસ્તથા ।
ભલ્લૂકસૃમરાભાસ્યાન્ ચામરાસ્યાંસ્તથા ગણાન્ ॥ ૧૯॥

શેષમાહિષવક્ત્રાંશ્ચ ખડ્ગગોમાયુવક્ત્રકાન્
વૃષભાસ્યાન્ રાસભાસ્યાન્ ઇભાસ્યાન્ કોકિલાસ્યકાન્ ।
એવં ગણગણં તત્ર દૃષ્ટ્વેશઃ પુરતઃ સ્થિતમ્ ।
કોટિત્રયાતિગણિતં નાનાવેષૈકભૂષિતમ્ ॥ ૨૦॥

રૂષિતં ભસિતેનૈવ ઘોષમાણં મુહુર્મુહુઃ ।
ત્રિપુણ્ડ્રભાલં રુદ્રાક્ષફણિહારવિભૂષિતમ્ ॥ ૨૧॥

અસિકાર્મુકનિસ્ત્રિંસખડ્ગખેટધરં તદા ।
બાણબાણાસનધરં કરવાલસત્કટિમ્ ॥ ૨૨॥

કુન્તશાતારિમુત્કૃષ્ટં પ્રણતં પુરતઃ સ્થિતમ્ ।
સાસ્રાવિલાક્ષસ્ત્ર્યક્ષસ્તાન્ મુહુરીક્ષન્નુવાચહ ॥ ૨૩॥

વીરભદ્રં પુરસ્કૃત્ય રુદ્રકોટિસમન્વિતમ્ ।

ઈશ્વર ઉવાચ ।

વીરભદ્ર સદાભદ્ર તવાસ્તુ વિજયો ગણૈઃ ॥ ૨૪॥

તૂર્ણં પ્રયાહિ દક્ષસ્ય યજ્ઞવાટં સુરૈર્વૃતમ્ ।
વિષ્ણુબ્રહ્માદિવિબુધૈઃ ક્ષણાદ્વિધ્વંસયાધુના ॥ ૨૫॥

તેન મે પ્રીતિરતુલા મા તે વિઘ્નોઽત્ર સમ્પ્રતિ ।

(સ્કન્દ ઉવાચ)

ઇત્યુક્તોઽથ મહેશેન વીરભદ્રો ગણૈઃ સહ ॥ ૨૬॥

મત્તવારણસઙ્કાશૈર્યયૌ ગણગણૈર્વૃતઃ ।
નત્વા તં શ્રીમહાદેવં વીરભદ્રો નદંસ્તદા ॥ ૨૭॥

ગણા જગર્જુશ્ચ તદા ભ્રામયન્તોઽસ્ત્રમણ્ડલમ્ ।
ગણેશ્વરકૃતારાવબધિરીકૃતદિઙ્મુખમ્ ॥ ૨૮॥

તન્મખં લેખકૈઃ સાર્ધં દુર્મુખં સમપદ્યત ।
તદા વાતા વવુર્લોકે તત્ર વા ભયશંસિનઃ ॥ ૨૯॥

પર્વતાશ્ચ વ્યશીર્યન્ત ચકમ્પે ચ વસુન્ધરા ।
મારુતૈશ્ચાપ્યઘૂર્ણન્ત ચુક્ષુભે વરુણાલયઃ ॥ ૩૦॥

અગ્નયો નાપ્યદીપ્યન્ત ન ચ ભાતિ પ્રભાકરઃ ।
ગ્રહાશ્ચ ન પ્રકાશન્તે પેતુર્નક્ષત્રપઙ્ક્તયઃ ॥ ૩૧॥

ઉલ્કા કબન્ધસહિતા પપાત મખસંસદિ ।
ગણેશ્વરૈઃ સમારુહ્ય રથં ભદ્રો ગિરિપ્રભમ્ ॥ ૩૨॥

સહસ્રાશ્વં પતાકાઢ્યં કુમ્ભરાજત્પતાકકમ્ ।

ગણાસ્તમન્વયુસ્તત્ર વિવિધાયુધપાણયઃ ॥ ૩૩॥

ગર્જન્તશ્ચાતિહૃષ્યન્તો ભિન્દન્તો ગાં શરાવરૈઃ ।
શૂલમૂલૈર્ગિરિવ્રાતં ધનુષ્કોટ્યોત્સૃજન્ત્યપિ ॥ ૩૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વીરભદ્રપ્રતિ શિવાજ્ઞાકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૬ વીરભદ્રવિષ્ણુયુદ્ધમ્ । ૧૨-૩૪ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 6 vIrabhadraviShNuyuddham . 12-34 ..

Notes:

Skanda સ્કન્દ narrates (to Jaigīṣavya જૈગીષવ્ય); about the formidable Vīrabhadra વીરભદ્ર (a.k.a Bhairava ભૈરવ due to His frightening appearance) who had manifested from the dreadlocks of Śiva શિવ and is eager about receiving instructions from Him and executing them.

Proofread by Ruma Dewan

---

*Virabhadraprati Shivajnakathanam*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*